


नवग्रह जपविधि

खेमराज श्रीकृष्णदास प्रकाशन
बम्बई

श्रीगणेशाय नमः

वेदोक्त और तंत्रोक्त

नवग्रहजपविधिः

हनूमान शर्मा, चौमूँ (जैपुर)
द्वारा सङ्कलित.

★

खेमराज श्रीकृष्णदास प्रकाशन बम्बई

संस्करण : मार्च २०१९, संवत् २०७५

मूल्य : ५० रुपये मात्र ।

मुद्रक एवं प्रकाशक:
खेमराज श्रीकृष्णदास,™
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
मुंबई - ४०० ००४.

Printers & Publishers :
Khemraj Shrikrishnadass Prop: Shri Venkateshwar Press, Khemraj Shrikrishnadass Marg, 7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.Khe-shri.com
Email : khemraj@vsnl.com

Printed by Sanjay Bajaj For M/s.Khemraj Shrikrishnadass Proprietors Shri Venkateshwar Press, Mumbai-400 004, at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate, Pune 411 013

सूचना

★

ललित ज्योतिषके माननेवाले जब कभी जन्मपत्र, वर्षपत्र, मासपत्र, दिनपत्र, गोचराष्टकवर्ग दशा–अंतर्दशा अथवा विवाहादिमें कोई अशुभ फलदायी ग्रह देखते हैं तब उसके लिये सूर्यादि ग्रहोंके जप, दान, पूजा, पाठ, व्रत और होम आदि किया करते हैं। इसके लिये अबतक कोई ऐसा संग्रह नहीं था जिसके द्वारा उपरोक्त सब काम किये या कराये जा सकें। इस अभावको दूर करनेके लिये यह "नवग्रहजपविधि" प्रकाशित की गई है। यह संग्रह बहुत संक्षेपसे है। परन्तु इसमें नवग्रहजपविधि, नवग्रहव्रतविधि, नवग्रहशांतिविधि, नवग्रहपूजाविधि नवग्रहदानविधि और गणपतिमंत्रजपविधि आदि आवश्यक विषय सब लिख दिये गये हैं। इसके द्वारा सब काम संक्षेपसे और यथामति विस्तारसे भी सांगोपांग हो सकते हैं अतः आशा है सर्व साधारणको इससे अधिक लाभ होगा।

माघी वसन्त,
संवत् १९८५ वि

शुभषी–
हनूमान शर्मा,
चौमू.

श्रीः

वेदोक्तनवग्रहजपविधिः

कृतनित्यक्रियः शुद्धासने समुपविश्य आचम्य प्राणानायम्य देशकालौसंकीर्त्य ॐ तत्सदद्येत्यादि० मम (यजमानस्य वा) जन्म-वर्ष-मासादिषु येऽनिष्ट-फलकारका ग्रहास्तेषामानुकूल्यार्थं सकलाधिव्याधिझ-टितिप्रशमनपूर्वकदीर्घायुष्यबलपुष्टिनैरुज्यादिसकलेष्ट-सिद्ध्यर्थममुकग्रप्रीतये अमुकग्रहस्य अमुकसंख्यया जपं करिष्ये । तदंगीभूतं (यथा संख्यया) आदौ गणपतिजपं करिष्ये ।

भाषा-जन्म वर्ष मासादिमें उपस्थित अनिष्ट फलकारी ग्रहकी शांतिके लिये जप करने हों तो पहले शौच स्नानादि नित्य कर्म किये पीछे शुद्धासनपर बैठकर प्रतिज्ञा संकल्प करे । उसमें जिस कामनाके लिये जिस ग्रहके जो कुछ जप या पूजा पाठ करने हों उसका उद्देश्य करके संकल्प

गणपतिमंत्रजपविधिः

ॐ अस्य श्रीगणपतिमंत्रस्य भार्गव ऋषिः अनुष्टुप् छन्दः विघ्नेशो देवता वं बीजं य शक्तिः गणपतिप्रसादसिद्ध्यर्थं जपे विनियोगः । ॐ भार्गवऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमः मुखे । विघ्नेशदेवतायै नमः हृदये वंबीजाय नमः गुह्ये । यं शक्तये नमः पादयोः । (इति ऋष्यादिन्यासः)

वं अंगुष्ठाभ्यां नमः । क्रं तर्जनीभ्यां नमः । तुं मध्यमाभ्यां नमः । डां अनामिकाभ्यां नमः । यं कनि-

---

करना चाहिये और संकल्प किये पीछे सर्व प्रथम गणेशजीके जप करने चाहिये ।

गणपति–मंत्र जप करनेकी यह विधि है कि–

'ॐ अस्य श्रीगणपतिमंत्रस्य०' इत्यादिसे विनियोग करके उपरोक्त प्रकारसे अंगन्यास करन्यास और ध्यान

ष्ठिकाभ्यां नमः । हुं करतलकरपृष्ठाभ्यां नमः । (इति करन्यासः)

वं हृदयाय नमः । क्रं शिरसे स्वाहा । तुं शिखायै वषट् । डां कवचाय हुम् । यं नेत्रत्रयाय वौषट् हुं अस्त्राय फट् । (इति अंग०)

अथ ध्यानम् । "उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः पाशांकुशाभयवरान्दधतं गजास्यम् । रक्तांबरं सकलदुः-खहरं गणेशं ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥"
अथ मूलमंत्रः—ॐ वक्रतुण्डाय हुं ॥ (इति ग. मं. ज.)

करके 'ॐ वक्रतुंडाय हुं' इस मन्त्रका जप करे । (इति)

अथ सूर्यमंत्रजपविधिः

१ माणिक
२ गेहूं
३ धेनु
४ रक्तवस्त्र
५ गुड
६ हेम
७ ताम्र
८ रक्तचन्दन
९ रक्तकमल



मध्यवर्तुलमंडल अ. १२ कलिंगदेशाद्भव काश्यपसगोत्र रक्तवर्ण सिंहको स्वामी जप ७०००

ॐ आकृष्णेनेत्यस्य हिरण्यस्तूप ऋषिः अनुष्टुप् छन्दः सविता देवता रजसेति बीजम् वर्तमान इति शक्तिः सूर्यप्रीतये जपे विनियोगः ।

ॐ हिरण्यस्तूप ऋषये नमः शिरसि । त्रिष्टुप्छन्दसे नमो मुखे । सवितृदेवतायै नमः हृदये । रजसा बीजाय नमः गुह्ये । वर्तमानशक्तये नमः पादयोः । (इति ऋ० न्या०)

सूर्यमंत्रजपकीविधि—गणेशजीके जप किये पीछे सूर्यका जप करे । इसमें सर्व प्रथम 'ॐ आकृष्णेनेत्यस्य०' इत्या-

ॐ आकृष्णेनेति अंगुष्ठाभ्यां नमः । ॐ रजसेति तर्जनीभ्यां नमः । ॐ वर्तमानेति मध्यमाभ्यां नमः । ॐ निवेशयन्नमृतं मर्त्यं चेति अनामिकाभ्यां नमः । ॐ हिरण्ययेन सविता रथेनेति कनिष्ठिकाभ्यां नमः । ॐ आदेवो याति भुवनानि पश्यन्निति करतलकर-पृष्ठाभ्यां नमः । (इति करन्यासः)

ॐ आकृष्णेनेति हृदयाय नमः । ॐ रजसेति शिरसे स्वाहा । ॐ वर्तमानेति शिखायै वषट् । ॐ निवेशयन्नमृतं मर्त्यं चेति कवचाय हुम् । ॐ हिर-ण्येन सविता रथेनेति नेत्रत्रयाय वौषट् । ॐ आदेवो याति भुवनानि पश्यन्निति अस्त्राय फट् । (इति हृदयादि०)

दिकका स्मरण या उच्चारण करके विनियोग करे। और विनियोग करके 'हिरण्यस्तूपऋषये नमः शिरसि०' इत्यादिसे ऋषि आदिका, 'ॐ आकृष्णेनेति अंगुष्ठाभ्यां नमः' इत्यादिसे अंगुष्ठादिका और 'ॐ आकृष्णेनेति हृद-याय नमः' इत्यादिसे हृदय शिर और शिखा आदिका

अथ ध्यानम्--"ॐ पद्मासनः पद्मकरोद्विबाहुः पद्मद्युतिः सप्ततुरंगवाहनः । दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः ॥ १ ॥" एवं ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

(सूर्यमंत्रः) ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥ १ ॥ (अस्य जपसंख्या ७०००)

जपांते अर्कसमित्तिलपायसघृतैर्दशांशहोमः । तद्दशांशेन तर्पणं तद्दशांशेन मार्जनं तद्दशांशेन ब्राह्मणभोजनं च कार्यम् ।

इति सूर्यजपविधिः

न्यास करे फिर 'पद्मासनः पद्मकरो द्विबाहुः' इससे सूर्य भगवान्‌का ध्यान करके उनका मानसोपचारसे पूजन करे और फिर 'ॐ आकृष्णे०' इस मन्त्रका जप करे । इसके ७००० जप होते हैं । जप किये पीछे दशांश होम तर्पण मार्जन आदि करे । (इ. सू. ज.)

अथ चन्द्रमन्त्रजपविधिः

१ कंशपात्र
२ तंदुल
३ कर्पूर
४ मौक्तिक
५ श्वेतवस्त्र
६ वृषभ
७ रौप्य
८ घृतकुंभ
९ शंख



आग्नेय्यां चतुरस्रमंडल अं. ४ यमुनातीर देश
आत्रेयस गोत्र श्वेतवर्ण कर्कको स्वामी जप ११०००

ॐ इमं देवा इति मंत्रस्य गौतम ऋषिः द्विपदा विराट् छंदः सोमो देवता असपत्नमिति बीजम् सोम प्रीत्यर्थें जपे विनियोगः।

ॐ गौतमऋषये नमः शिरसि। द्विपदाविराट्छंदसे नमः मुखे। सोमदेवतायै नमः हृदि। असपत्नबीजाय नमः गुह्ये। सोमजपे विनियोगाय नमः सर्वांगे। (इ. ऋ. न्या.)

ॐ इमं देवाऽअसपत्न ꣳसुवध्वमित्यंगुष्ठाभ्यां नमः।

इसीप्रकार चंद्रमाके जप करते समय 'इमं देवा इति मंत्रस्य गौतम ऋषिः०' इत्यादिसे विनियोग करके 'गौत-

ॐ महते क्षत्रायेति तर्जनीभ्यां नमः। ॐ महते ज्यैष्ठ्यायेति मध्यमाभ्यां नमः। ॐ महते जानराज्यायेंद्रस्येंद्रियायेत्यनामिकाभ्यां नमः। ॐ इमममुष्य पुत्रममुष्यै कनिष्ठिकाभ्यां नमः। ॐ पुत्रमस्यै विशऽएषवोऽमी राजा सोमोऽस्माकंब्राह्मणानाᳫं राजेति करतलकरपृष्ठाभ्यां नमः। (इति करन्या०)

ॐ इमं देवाऽअसपत्नᳫं सुवध्वम् इति हृदयाय नमः। ॐ महते क्षत्रायेति शिरसे स्वाहा। ॐ महते ज्यैष्ठ्यायेति शिखायै वषट्। ॐ महते जानराज्यायेंद्रस्येंद्रियायेति कवचाय हुम्। ॐ इममसुष्य पुत्रममुष्यै नेत्रत्रयाय वौषट्। ॐ पुत्रमस्यै विशऽएषवोमी राजा सोमोस्माकं ब्राह्मणानाᳫं राजा इत्यस्त्राय फट्।

मऋषये नमः' शिरसि इत्यादिसे ऋषिन्यास, 'इमं देवाऽअसपत्नᳫं०' इत्यादिसे करन्यास और इमंदेवाऽअसपत्नᳫं' इत्यादिसे अंगन्यास करे। तत्पश्चात्—'ॐ श्वेतां-

अथ ध्यानम् । "ॐ श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दण्डकरो द्विबाहुः । चन्द्रोऽमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः ॥ २ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य जप कुर्यात् ।

चंद्रमंत्रः । ॐ इमं देवाऽअसपत्नᳪसुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेंद्रस्येंद्रियाय इमममुष्य पुत्र-ममुष्यै पुत्रमस्यै विशऽएषवोमी राजा सोमोस्माकं ब्राह्मणानाᳪराजा ॥ २॥ अस्य जपसंख्या ११ सहस्राणि । जपांते पलाशसमित्तिलपायसघृतैर्दशांशहोमः (इ. चं. ज.)

बरः श्वेतविभूषणश्च०' इससे चंद्रदेवका ध्यानकरे और फिर मानसोपचारसे पूजन करके 'ॐ इमं देवाऽअसपत्नᳪ सुवध्वं०' इस मंत्रका जप करे । जपसंख्या इसकी ११००० है । जप किये पीछे उनके दशांशका होम, तर्पण मार्जन और ब्राह्मणभोजन करावे । (इति चन्द्र जपविधि)

अथ भौममंत्रजपविधिः

१ मवाल
२ गेहूं
३ मसूर
४ लालवैल
५ गुड
६ सुवर्ण
७ रक्तवस्त्र
८ कनेरपुष्प
९ ताम्र



द. त्रिकोणमंडल अं. ३ अवंतीदेशोद्भवभारद्वाजस गोत्ररक्तवर्ण वृश्चिकमेषेको स्वा. जप १०००

ॐ अग्निर्मूर्धेति मंत्रस्य विरूपाक्ष ऋषिः गायत्री छंदः भौमो देवता ककुद्बीजम् भौमप्रीतये जपे विनियोगः ।

ॐ विरूपाक्षऋषये नमः शिरसि । गायत्रीछंदसे नमः मुखे । भौमदेवतायै नमः हृदि । ककुद्बीजाय नमः गुह्ये । भौमप्रीतये विनियोगाय नमः सर्वांगे । (इ. ऋ.)

भौममंत्र जप करते समय 'ॐ अग्निर्मूर्धेति मंत्रस्य०' इत्यादिसे विनियोग करके 'ॐ विरूपाक्ष ऋषये नमः शिरसि' इत्यादिसे ऋषिन्यास 'ॐ अग्निर्मूर्द्धेत्य'०

ॐ अग्निर्मूर्द्धेत्यंगुष्ठाभ्यां नमः । ॐ दिवः ककुदिति तर्जनीभ्यां नमः । ॐ पतिः पृथिव्या अयमिति मध्यमाभ्यां नमः । ॐ अपामित्यनामिकाभ्यां नमः । ॐ रेताᳬसीति कनिष्ठिकाभ्यां नमः । ॐ जिन्वतीति करतलकरपृष्ठाभ्यां नमः । (इति करन्यासः)

ॐ अग्निर्मूर्द्धेति हृदयाय नमः । ॐ दिवः ककुदिति शिरसे स्वाहा । ॐ पतिः पृथिव्या अयमिति शिखायै वषट् । ॐ अपां कवचाय हुम् । ॐ रेताᳬसीति नेत्रत्रयाय वौषट् । ॐ जिन्वतीत्यस्त्राय फट् । (इति हृद०)

अथ ध्यानम् । ॐ रक्तांबरो रक्तवपुः किरीटी चतुर्भुजो मेषगतो गदाभृत् । धरासुतः शक्तिधरश्च

अंगुष्ठाभ्यां इत्यादिसे करन्यास और 'अग्निमूर्द्धेति हृदयाय नमः' इत्यादिसे अंगन्यास करे । फिर 'रक्तांबरो रक्तवपुः०' इससे मंगलका ध्यान करके मानसोपचारसे

शूली सदा मम स्याद्वरदः प्रशांतः ॥ ३ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

भौममंत्रः । ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपाᳬं रेताᳬंसि जिन्वति ॥ ३ ॥ अस्य जपसंख्या दशसहस्राणि । जपांते खदिरसमित्तिलपायसघृतैर्दशांशहोमः । (इति भौमजपविधिः)

पूजन करे और 'अग्निर्मूर्द्धा०' इस मंत्रका जप करे । जपसंख्या दश हजार है । जप किये पीछे खदिरकी समिधा, तिल, पायस (खीर) और घृतसे दशांश होम करे । (इति भौम० विधिः)

अथ बुधमन्त्रजपविधिः

१ नीलवस्त्र
२ सुवर्ण
३ गारुत्म
४ कांस्य
५ मृगमद
६ आज्य
७ सर्वपुष्प
८ दासी
९ हस्तिदंत



ईशान्यांवाणाकारमंडल मगधदेशआत्रेयसगोत्र
कन्यामिथुनको स्वामी अंगुल ४ जप ८०००

ॐ उद्बुध्यस्वेति मंत्रस्य परमेष्ठी ऋषिः बृहती छंदः बुधो देवता त्वमिष्टापूर्तं समिति बीजम् । बुधप्रीतये जपे विनियोगः ।

ॐ परमेष्ठिऋषये नमः शिरसि । बृहतीछंदसे नमः मुखे । बुधदेवतायै नमः हृदये । त्वमिष्टापूर्तं समिति बीजाय नमः गुह्ये । बुधजपे विनियोगाय नमः सर्वांगे । (इति ऋष्यादि०)

"बुध" के लिये 'ॐ उद्बुध्यस्वेति०' से विनियोग करके 'ॐ परमेष्ठि०' इत्यादिसे ऋष्यादि न्यास 'ॐ उद्-

ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि अंगुष्ठाभ्यां नमः। ॐ त्वमिष्टापूर्ते सं तर्जनीभ्यां नमः। ॐ सृजेथामयं च मध्यमाभ्यां नमः। ॐ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन् अनामिकाभ्यां नमः। ॐ विश्वेदेवाः कनिष्ठिकाभ्यां नमः। ॐ यजमानश्च सीदत करतलकरपृष्ठाभ्यां नमः। ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि हृदयाय नमः। ॐ त्वमिष्टापूर्ते सं शिरसे स्वाहा। ॐ सृजेथामयं च शिखायै वषट्। ॐ अस्मिन्त्सधस्थेऽः अध्युत्तरस्मिन्कवचाय हुम्। ॐ विश्वेदेवा नेत्रत्रयाय वौषट्। ॐ यजमानश्च सीदत अस्त्राय फट् (इति अंगन्यासः)

अथ ध्यानम् "हरिद्रपुश्चांबरवान् किरीटी चतुर्भुजो दण्डधरश्च सौम्यः। चर्मासिधृक् सोमसुतः सदा बुध्यस्वाग्ने' इत्पादिसे करन्यास और इसीसे अंगन्यास करके 'हारिद्रपुश्चांबरवान् किरीटी' इससे बुधके स्वरूपका

मे सिंहाधिरूढो वरदो बुधश्च ॥ ४ ॥ " इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

बुधमंत्रः । ॐ उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सᳬसृजेथामयञ्च । अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्च सीदत ॥ ४ ॥ जपसंख्याष्टसहस्राणि जपांते अपामार्गसमित्तिलपायसघृतैर्दशांशहोमः (इ० बु० ज०)

ध्यान करे । और मानसोपचारसे पूजन करके "ॐ उद्बुध्यास्वाग्ने प्रतिजागृहित्वमिष्टापूर्ते०" इस मंत्रका जप करे । (जप ८००० होते हैं ।) जप किये पीछे अपामार्ग (चिचिडा), तिल, पायस, (खीर) और घृतसे दशांश होम करे । [हवनका दशांश तर्पण, तर्पणका दशांश मार्जन और मार्जनका दशांश ब्राह्मणभोजन कराना चाहिये] (इति बुधमंत्र जपविधि)

अथ गुरुमन्त्रजपविधिः

१ अश्व
२ शर्करा
३ हलद
४ पीतधान्य
५ पीतवस्त्र
६ पुष्पराग
७ सैंधव
८ कांस्य
९ कांचन



उ. दीर्घचतुरस्रमंडल अंगुल ६ सिंधुदेशोद्भवआंगिरसगो. पी. व. धनु मीनको स्वामी जप १९०००

ॐ बृहस्पते इति मंत्रस्य गृत्समद ऋषिः त्रिष्टुप् छंदः बृहस्पतिर्देवता बृहस्पतिप्रीत्यर्थेजपे विनियोगः। ॐ गृत्समदऋषये नमः शिरसि। त्रिष्टुप्छंदसे नमः मुखे। बृहस्पतिदेवतायै नमः हृदये। (इति ऋष्यादिन्यासः)

ॐ बृहस्पते अति यदर्य्यो इत्यंगुष्ठाभ्यां नमः। ॐ अर्हाद् द्युमदिति तर्जनीभ्यां नमः। ॐ विभाति

इसीप्रकार बृहस्पतिके लिये ॐ बृहस्पते इति मंत्रस्य०' इत्यादिसे विनियोग करके ऋष्यादिकोंका न्यास

क्रतुमदिति मध्यमाभ्यां नमः । ॐ जनेषु अनामिकाभ्यां नमः । ॐ यदीदयच्छ्वसऽऋतप्प्रजात तदस्मासु कनिष्ठिकाभ्यां नमः ॐ द्रविणं धेहि चित्रमिति करतलकरपृष्ठाभ्यां नमः ।(इति० कर०)

ॐ बृहस्पतेऽअतियदर्यो हृदयाय नमः । ॐ अर्हाद् द्युमदिति शिरसे स्वाहा । ॐ विभाति क्रतुमदिति शिखायै वषट् । ॐ जनेषु कवचाय हुम् । ॐ यदीदयच्छ्वसऽऋतप्प्रजात तदस्मासु नेत्रत्रयाय वौषट् । द्रविणं धेहि चित्रमित्यस्त्राय फट् । (इति० हृदि०)

अथ ध्यानम् । "पीतांबरः पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः । दधाति दण्डं च कमंडलुं

करे । और 'ॐ बृहस्पते अतिय०' इत्यादिसे करन्यास और अंगन्यास करके "पीतांबरः पीतवपुः किरीटी०"

च तथाऽक्षसूत्रं वरदोऽस्तु मह्यम् ॥ ६ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

गुरुमंत्रः । ॐ बृहस्पतेऽअति यदर्योऽअर्हाद् द्युमद्विभाति क्रतुमज्जनेषु । यदीदयच्छवसऽऋतप्प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ ६ ॥" जपसंख्या १९ सहस्राणि । जपांते अश्वत्थसमित्तिलपायसघृतैर्दशांशहोमः । (इति गुरुमन्त्रजपविधिः समाप्तः)

इससे बृहस्पतिके स्वरूपका ध्यान करे । फिर "ॐ बृहस्पतेऽअतियदर्योऽअर्हा०" इस मंत्रका जप करे । जप करनेके पहले बृहस्पतिका मानसोपचार पूजन भी कर ले । जप १९ हजार होते हैं, जप किये पीछे दशांश हवन तर्पण मार्जन और ब्राह्मणभोजन कराये ।

(इति गुरुमंत्रजपविधि) ॥

अथ शुक्रमन्त्रजपविधिः

१ चित्रांबर
२ श्वेताश्व
३ धेनु
४ हीरा
५ रौप्य
६ सुवर्ण
७ चावल
८ सुगंधपत्र
९ चन्दन



पूर्वे पंचकोणमंडल वृषतुलाको स्वामी भोजकट देश भार्गवसगोत्र श्वेतवर्ण जप १६०००

ॐ अन्नात्परिस्रुत इति मंत्रस्य पराशर ऋषिः शक्करी च्छन्दः शुक्रो देवता रसं ब्रह्मणेति बीजम् शुक्रप्रीत्यर्थं जपे विनियोगः ।

ॐ पराशरऋषये नमः शिरसि । शक्करीछंदसे नमः मुखे । शुक्रदेवतायै नमः हृदये । रसं ब्रह्मणा इति बीजाय नमः गुह्ये । (इति ऋष्यादि०)

इसी प्रकार शुक्रके जप करते समय 'ॐ अन्नात्परिस्रुत इति मंत्रस्य०' से विनियोगकरके 'ॐ पराशर ऋषये नमः शिरसि०' इत्यादिसे ऋष्यादिन्यास 'ॐ अन्नातप-

ॐ अन्नात्परिस्रुत इत्यंगुष्ठाभ्यां नमः ॐ रसं ब्रह्मणा व्यपिबत् इति तर्जनीभ्यां नमः । ॐ क्षत्रं पय इति मध्यमाभ्यां नमः । ॐ सोमं प्रजापतिरित्यनामिकाभ्यां नमः । ॐ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमंधस इति कनिष्ठिकाभ्यां नमः । ॐ इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु इति करतलकरपृष्ठाभ्यां नमः । (इति करन्यासः)

ॐ अन्नात्परिस्रुतो हृदयाय नमः । ॐ रसं ब्रह्मणा व्यपिबत् शिरसे स्वाहा । ॐ क्षत्रं पयः शिखायै वषट् । सोमं प्रजापतिरिति कवचाय हुम् । ॐ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमंधसो नेत्रत्रयाय वौषट् । ॐ इन्द्रस्येंद्रियमिद पयोऽमृतं मधु इत्यस्त्राय फट् । (इति हृदयादिन्यासः ।)

रिस्रुत इत्यंगुष्ठाभ्यां नमः’ इत्यादिसे करन्यास और

अथ ध्यानम् " श्वेतांबर श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः । तथाऽक्षसूत्रं च कमंडलुं च दंड च बिभ्रद्वरदोऽस्तु मह्यम् ॥ ६ ॥ " इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

शुक्रमंत्रः । ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिबत क्षत्रम्पयः सोमं प्रजापतिः । ऋतेन सत्यमिंद्रियं विपानꣳ शुक्रमन्धसऽइन्द्रस्येंद्रियमिदं पयोऽमृतं मधु ॥ ६ ॥ (जपसंख्या १६००० । जपांते औदुंबरसमित्तिलपायसघृतैर्दशांशहोमः । (इति शुक्रमन्त्रजपविधिः)

इसीसे अंगन्यास करे । फिर "श्वेतांबरः श्वेतवपुः किरीटी०" इससे शुक्रकी मूर्तिका ध्यान करके मानसोपचारसे पूजा करे । और " ॐ अन्नात्परिस्रुतो०" इस मंत्रका जप करे । जप १६ हजार होते हैं । जप किये पीछे दशांश होम, तर्पणआदि करे । (इति शुक्रमन्त्रजपविधिः) ॥

अथ शनिमंत्रजपविधिः

१ माष
२ तिल
३ तैल
४ कुलित्य
५ माहिषी
६ लोह
७ श्यामधेनु
८ इंद्रनील
९ श्यामवस्त्र



प. धनुषाकारमंडल अं. २ सौराष्ट्र देश काश्यपस-गोत्र मकरकुंभको स्वा. कृ. व. जप २३०००

ॐ शन्नो देवीरिति मंत्रस्य दध्यङ्ङाथर्वण ऋषिः गायत्री छंदः शनिर्देवता आपो बीजं वर्तमान इति शक्तिः शनैश्चरप्रीत्यर्थं जपे विनियोगः।

ॐ दध्याङ्ङाथर्वणऋषये नमः शिरसि। गायत्रीछंदसे नमः मुखे। शनैश्चरदेवतायै नमः हृदये। आपोबीजाय नमः गुह्ये। वर्तमानशक्तये नमः पादयोः। (इति ऋष्यादि०)

शनिमंत्र जप करते समय "शन्नो देवीरिति मंत्रस्य०" इससे विनियोग करे । ॐ दध्यङ्ङाथर्वणऋषये

ॐ शन्नो देवीरित्यंगुष्ठाभ्यां नमः। ॐ अभिष्टये तर्जनीभ्यां नमः। ॐ आपो भवंतु मध्यमाभ्यां नमः। ॐ पीतये अनामिकाभ्यां नमः। ॐ शंय्योरिति कनिष्ठिकाभ्यां नमः। ॐ अभिस्रवंतु नः इति करतलकरपृष्ठाभ्यां नमः। इति करन्यासः)

ॐ शन्नोदेवीरिति हृदयाय नमः। ॐ अभिष्टये शिरसे स्वाहा। ॐ आपो भवंतु शिखायै वषट्। ॐ पीतये कवचाय हुम्। ॐ शंयोरिति नेत्रत्रयाय वौषट्। ॐ अभिस्रवंतु नः अस्त्राय फट्। (इति हृदयादिन्यासः।)

अथ ध्यानम्। "नीलद्युतिः शूलधरः किरीटी

नमः०" इत्यादिसे विनियोग और ऋष्यादिकोंका न्यास करे। तथा 'ॐ शन्नो देवी० ' इत्यादिसे करन्यास और अंगन्यास करना चाहिये। फिर "नीलद्युतिः०" इससे शनिके स्वरूपका ध्यान करके "ॐ शन्नो देवीरभिष्टय०" इस मंत्रका जप करे। जप २३ हजार


गजस्थितस्त्रासकरो धनुष्मान् । चतुर्भुजः सूर्यसुतः प्रशांतः सदाऽस्तु मह्यं वरदो महात्मा । ॥ ७ ॥ ”
इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

शनिमंत्रः–ॐ शन्नो देवीरभिष्टयऽआपो भवंतु पीतये । शंयोरभिस्रवंतु नः ॥ ७ ॥ जपसंख्या २३००० । जपांते शमीसमित्तिलपायसघृतैर्दशांशहोमः । (इति शनिमंत्रजप विधिः समाप्तः) ॥

होते हैं । जप किये पीछे शमी, तिल, पायस और घृतसे दशांश हवन, तद्दशांश तर्पण, तद्दशांश मार्जन और तद्दशांश ब्राह्मणभोजन कराये (इति शनि-मंत्रजपविधि)

अथ राहुमन्त्रजपविधिः

१ नीलरत्न
२ अश्व
३ नीलवस्त्र
४ कंबल
५ तिल
६ तैल
७ लोह
८ अभ्रक
९ गेहूँ



नैर्ऋत्यां शूर्पाकारमंडल अं. १२ राठांनदेश पैठानिसगोत्र, कृष्णवर्ण जप १८०००

ॐ कयान इति मंत्रस्य वामदेवऋषिः गायत्री छंदः राहुर्देवता कयानेति बीजं शचिरिति शक्तिः राहुप्रीत्यर्थं जपे विनियोगः।

ॐ वामदेवऋषये नमः शिरसि। गायत्रीछंदसे नमः मुखे। राहुदेवतायै नमः हृदये। कयान इति बीजाय नमः गुह्ये। शचिरिति शक्तये नमः पादयोः। (इति ऋष्यादिन्यासः)

इसी प्रकार राहुके लिये'ॐकयान०' इत्यादिसे विनि-योग करके ऋष्यादिका न्यास करे । और 'ॐ कया-

ॐ कयान इत्यंगुष्ठाभ्यां नमः। ॐ चित्रेति तर्जनीभ्यां नमः। ॐ आभुवेति मध्यमाभ्यां नमः। ॐ दूती सदा वृध इत्यनामिकाभ्यां नमः। ॐ सखाकया इति कनिष्ठिकाभ्यां नमः। ॐ शचिष्ठया वृतेति करतलकरपृष्ठाभ्यां नमः। (इति करन्यासः)

ॐ कयान इति शिरसे स्वाहा। ॐ आभुव इति शिखायै वषट्। ॐ दूती सदा वृध इति कवचाय हुम्। ॐ सखा कया इति नेत्रत्रयाय वौषट्। ॐ शचिष्ठया वृता इत्यस्त्राय फट्। (इति हृदि०)

अथ ध्यानम् "नीलांबरो नीलवपुः किरीटी करालवक्त्रः करवालशूली। चतुर्भुजश्चर्मधरश्च राहुः सिंहा-

---


न०' इत्यादिसे करन्यास और अंगन्यास करके "नीलांबरो०" से राहुका ध्यान करे, फिर "ॐ कयान-

सनस्थो वरदोऽस्तु मह्यम् ॥ ८ ॥ " इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

राहुमंत्रः । ॐ कया नश्चित्रऽआभुवदूती सदा वृधः सखा । कया शचिष्ठया वृता ॥ ८ ॥ जपसंख्या १८ सहस्राणि । जपांते दूर्वासमित्तिलपायसघृतैर्दशांशहोमः । (इ. रां. ज.)

अथ केतुमंत्रजपविधिः

१ वैडूर्य
२ तिल
३ कंबल
४ कस्तूरी
५ शस्त्र
६ कृष्णवस्त्र
७ तैल
८ कृष्णपुष्प
९ छाग



वाय. ध्वजाकारमंडल केतु अंगुल ६ अन्तर्वेदी जैमिनिसगोत्र धूम्रवर्ण जप १७०००

केतुं कृण्वन्निति मंत्रस्य मधुच्छन्दऋषिः गायत्री छंदः

श्चित्रऽ०" इस मंत्रका जप करे । जप सं० १८००० होते हैं । (इति राहुमंत्रजपविधिः) ॥

केतुर्देवता अपेशसेति बीजं मर्य्या शक्तिः केतुप्रीत्यर्थे जपे विनियोगः ।

मधुऋषये नमः शिरसि । गायत्री छंदसे नमः मुखे । केतुदेवतायै नमः हृदये । अपेशसेति बीजाय नमः गुह्ये । मर्य्याशक्तये नमः पादयोः । केतुं कृण्वन् अंगुष्ठाभ्यां० अकेतवे तर्जनी० पेशोमर्या मध्यमा० अपेशसे अनामिका० समुषद्भिः कनिष्ठिका० अजायथाः करतलकर० । (इति करन्यासः)

केतुं कृण्वन्निति हृदयाय० । अकेतवे शिरसे० । पेशो मर्या शिखायै० । अपेशसे कवचाय० । समुषद्भिर्नेत्रत्र० वौ० । अजायथा अस्त्राय फट् ॥ (इति हृदयादिन्यासः) ॥

और केतुके लिये 'केतुं कृणवन्निति०' से विनियोग करके 'मधुऋषयेनमः' इत्यादिसे ऋष्यादिक न्यास- और 'केतुं कृणवन्न०' इत्यादिसे करन्यास तथा अंग-

अथ ध्यानम्। "धूम्रो द्विबाहुर्वरदो गदाभृद् गृध्रासनस्थो विकृताननश्च। किरीटकेयूरविभूषितांगः सदाऽस्तु मे केतुगणः प्रशांतः ॥ १ ॥" इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ।

केतुमंत्रः । "ॐ केतुं कृण्वन्न केतवे पेशो मर्य्याऽ-अपेशसे । समुषद्भिरजायथाः ॥ १ ॥ जपसं० १७ सहस्राणि । जपांते कुशसमित्तिलपायसघृतैर्दशांश-होमः । (इति केतुजपविधिः)

न्यास करे । फिर "धूम्रो द्विबाहुः०" से केतुका ध्यान करके 'ॐ केतुं कृण्वन्न केतवे०' इस मंत्रसे जप करे । जप १७ हजार होते हैं । जप किये पीछे कुशा, तिल, पायस और घृतसे दशांश हवन करे ।

इति सूर्यादीनां वेदोक्तजपविधिः समाप्तः

श्रीः

अथ तंत्रोक्तनवग्रहजपविधिः

तत्रादौ सूर्यमन्त्रजपविधिः

ॐ अस्य श्रीसूर्यमंत्रस्य अज ऋषिः गायत्री छन्दः सूर्यो देवता ह्रां बीजम् ह्रीं शक्तिः सः कीलकं सर्वाभीष्टसिद्धये जपे विनियोगः ।

भाषा–पहले वेदोक्त 'नवग्रहजपविधि' लिखी गयी थी । यह तंत्रोक्तजपविधि है । इसमें और उसमें केवल मंत्र तथा ऋषि आदिका अंतर है । और अंगन्यास, करन्यास यथावत् हैं । अतः इन तंत्रोक्त मंत्रोंसे उसी प्रकार यहाँ भी विनियोग और अंगन्यासादि करके मूलमंत्रके जप करने चाहिये । जपसंख्या जितनी अभीष्ट हो रख लेना चाहिये । हवनादि करने हों तो इसमें भी कर सकते हैं ।

ॐ अज ऋषये नमः शिरसि। गायत्री छंदसे नमः मुखे। सूर्यदेवतायै नमः हृदि। ह्रां बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। सः कीलकाय नमः सर्वांगे।

ॐ आं ह्रीं अंगुष्ठाभ्यां नमः। ॐ ईं ह्रीं तर्जनीभ्यां नमः। ॐ ऊँ ह्रीं मध्यमाभ्यां नमः। ॐ ऐं ह्रीं अनामिकाभ्यां नमः। ॐ औं ह्रीं कनिष्ठिकाभ्यां नमः। ॐ अः ह्रीं करतलकरपृष्ठाभ्यां नमः (इति करन्यासः) (एवं हृदयादि०)

अथ ध्यानम्। रक्तांबुजासनमशेषगुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि। पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणांगरुचिं त्रिनेत्रम्॥ १॥
अथ मूलमन्त्रः—"ह्राँ ह्रीं सः" इति जपेत्।

अथ चन्द्रमन्त्रजपविधिः

अस्य श्रीसोममंत्रस्य भृगुर्ऋषिः पंक्तिश्छन्दः सोमो देवता स्वौं बीजं नमः शक्तिः सर्वाभीष्टसिद्धये जपे विनियोगः।

ॐ भृगुऋषये नमः शिरसि। पंक्तिश्छंदसे नमः मुखे। सोमदेवतायै नमो हृदि। स्वौंबीजाय नमः गुह्ये। नमः शक्तये नमः पादयोः। (इति ऋष्यादिन्यासः)

ॐ सां अंगुष्ठाभ्यां नमः। ॐ सीं तर्जनीभ्यां नमः। ॐ सूं मध्यमाभ्यां नमः। ॐ सैं अनामिकाभ्यां नमः। ॐ सौं कनिष्ठिकाभ्यां नमः। ॐ सः करतलकर पृष्ठाभ्यां नमः। (एवं हृदयादिन्यासः)

अथ ध्यानम्। कर्पूरस्फटिकावदातमनिशं पूर्णेन्दुबिंबाननं मुक्तादामविभूषितेन वपुषा निर्मूलयंतं तमः। हस्ताभ्यां कुमुदं वरं च दधतं नीलालकोद्भासितं स्वीयांकस्थमृगोदिताश्रयगुणं सोमं सुधाब्धिं भजे॥२॥ अथ मूलमंत्रः–" स्वौं सोमाय नमः " इति जपेत्।

अथ भौममंत्रजपविधिः

ॐ अस्य श्रीमंगलमंत्रस्य विरूपा ऋषिः गायत्री

छंदः मंगलो देवता सर्वेष्टसिद्धये जपे विनियोगः।

ॐ विरूपाक्षऋषये नमः शिरसि। गायत्रीछन्दसे मुखे। मंगलदेवतायै नमो हृदये। (इति ऋष्यादिन्यासः)

ॐ अंगुष्ठाभ्यां नमः। हां तर्जनीभ्यां नमः। हं मध्यमाभ्यां नमः। सः अनामिकाभ्यां नमः। खं कनिष्ठिकाभ्यां नमः। खः करतलकरपृष्ठाभ्यां नमः। (इति कर० एवं हृदयादिन्यासः)

अथ ध्यानम्। जपाभ शिवस्वेदजं हस्तपद्मैर्गदा-शूलशक्तीर्वरं धारयंतम्। अवंतीसमुत्थं सुमेषासनस्थं धरानंदनं रक्तवस्त्रं समीडे ॥ ३ ॥ अथ मूलमंत्रः— "ॐ हाँ हँसः खंखः" इति जपेत्।

अथ बुधमंत्रजपविधिः

ॐ अस्य श्रीबुधमंत्रस्य प्रजापतिर्ऋषिः त्रिष्टुप् छंदः बुधो देवता अभीष्टसिद्धये जपे विनियोगः।

ॐ प्रजापतिऋषये नमः शिरसि। त्रिष्टुप्छंदसे नमः मुखे। बुधदेवतायै नमो हृदये। (इति ऋष्यादिन्यासः)

ॐ अंगुष्ठाभ्यां नमः। ॐ द्रां तर्जनीभ्यां नमः। ॐ द्रीं मध्यमाभ्यां नमः। ॐ द्रौं अनामिकाभ्यां नमः। ॐ सः कनिष्ठिकाभ्यां नमः। ॐ द्रां द्रीं द्रौं सः करतलकरपृष्ठाभ्यां नमः। (इति करन्यासः। एवं हृदयादिन्यासः)

अथ ध्यानम्। पीताम्बरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च सौम्यः। सिंहासनस्थोऽस्ति बुधो हरिप्रियः सदा मयि स्याद्वरदस्तु देवः॥ ४॥ अथ मूलमंत्रः–"ॐ द्रां द्रीं द्रौं सः" इति जपेत्।

अथ गुरुमंत्रजपविधिः

ॐ अस्य श्री बृहस्पतिमंत्रस्य ब्रह्मा ऋषिः अनुष्टुप् छंदः गुरुर्देवता बृं बीजं नमः शक्तिः सर्वेष्टसिद्धये जपे विनियोगः।

ॐ ब्रह्मऋषये नमः शिरसि। अनुष्टुप्छंदसे नमः

मुखे । बृहस्पतिदेवतायै नमः हृदये । बृं बीजाय नमः गुह्ये । नमः शक्तये नमः पादयोः । (इति ऋष्यादिन्यासः)

ॐ ब्रां अंगुष्ठाभ्यां नमः । ॐ ब्रीं तर्जनीभ्यां नमः । ॐ ब्रूं मध्यमाभ्यां नमः । ॐ ब्रैं अनामिकाभ्यां नमः । ॐ ब्रौं कनिष्ठिकाभ्यां नमः । (एवं हृदयादि०)

अथ ध्यानम् । रत्नाष्टापदवस्त्रराशिममलं दक्षात्किरंतं करादासीनं विपणौ करं निदधतं रत्नादिराशौ परम् । पीतालेपनपुष्पवस्त्रमखिलालंकारसंभूषितं विद्यासागरपारगं सुरगुरुं वंदे सुवर्णप्रभम् ॥ ५ ॥ अथ मूलमंत्रः–“ बृं बृहस्पतये नमः ” इति जपेत् ।

अथ शुक्रमंत्रजपविधिः

ॐ अस्य श्रीशुक्रमंत्रस्य ब्रह्माऋषिः विराट्छंदः शुक्रो देवता ॐ बीजम् स्वाहा शक्तिः सर्वेष्टसिद्ध्यर्थे जपे विनियोगः ।

ॐ ब्रह्मऋषये नमः शिरसि । विराट्छंदसे नमः मुखे । शुक्रदेवतायै नमः हृदये । बीजाय नमः गुह्ये । स्वाहाशक्तये नमः पादयोः । (इति ऋष्यादिन्यासः)

ॐ अंगुष्ठाभ्यां नमः । ॐ वस्त्रं तर्जनीभ्यां नमः । ॐ मे मध्यमाभ्यां नमः । ॐ देहि अनामिकाभ्यां नमः । ॐ शुक्राय कनिष्ठिकाभ्यां नमः । ॐ स्वाहा करतलकरपृष्ठाभ्यां नमः । (इति करन्यासः ।) एवं हृदयादिन्यासः ।)

अथ ध्यानम् । श्वेतांभोजनिषण्णमापणतटे श्वेतांबरालेपनं नित्यं भक्तजनाय संप्रददतं वासोमणीन्हाटकम् । वामेनैव करेण दक्षिणकरे व्याख्यानमुद्रांकितं शुक्रं दैत्यवरार्चितं स्मितमुखं वंदे सितांगप्रभम् ॥६॥ अथ मूलमंत्रः–" ॐ वस्त्रं मे देहि शुक्राय स्वाहा " इति जपेत् ।

अथ शनिमंत्रजपविधिः

ॐ अस्य श्रीशनिमंत्रस्याथर्वण ऋषिः गायत्री

छन्दः, शनैश्चरो देवता, आपो बीजं, शंशक्तिः अभी-ष्टसिद्धये जपे विनियोगः ।

अथर्वण ऋषये नमः शिरसि । गायत्रीछन्दसे नमः मुखे । शनैश्चरदेवतायै नमः हृदये । आपोबीजाय नमः गुह्ये । शं शक्तये नमः । पादयोः (इति ऋष्यादिन्यासः)

ॐ अंगुष्ठाभ्यां नमः । खां तर्जनीभ्यां नमः खीं मध्यमाभ्यां नमः । खौं अनामिकाभ्यां नमः । सः कनिष्ठिकाभ्यां नमः । ॐ खां खीं खूं सः करतलकरपृष्ठाभ्यां नमः (एवं हृदयादि०

अथ ध्यानम् । नीलांबरः शूलधरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् । चतुर्भुजः सूर्यसुतः प्रशांतः सदाऽस्तु मह्यं वरदोऽल्पगामी ॥ ७॥ इति ध्यात्वा " ॐ खां खीं खूं सः " इति मूलमंत्रं जपेत् ।

अथ राहुमंत्रजपविधिः

ॐ अस्य श्रीराहुमंत्रस्य वामदेव ऋषिः गायत्री

छन्दः अं बीजं दूती कीलकम् अभीष्टसिद्धये जपे विनियोगः ।

वामदेवऋषये नमः शिरसि । गायत्रीछंदसे नमः मुखे । अं बीजाय नमः गुह्ये । सं शक्तये नमः पादयोः । (इति ऋष्यादिन्यासः)

ॐ अंगुष्ठाभ्यां नमः । भ्रां तर्जनीभ्यां नमः । भ्रीं मध्यमाभ्यां नमः । भ्रौं अनामिकाभ्यां नमः । सः कनिष्ठिकाभ्यां नमः । ॐ भ्रां भ्रीं भ्रौं सः करतल-करपृष्ठाभ्यां नमः । (एवं हृदयादि०)

अथ ध्यानम् । नीलांबरो नीलवपुः किरीटी करालवक्त्रः करवालशूली । चतुर्भुजश्चक्रधरश्च राहुः सिंहासनस्थो वरदस्तु मह्यम् ॥ ८ ॥ " " ॐ भ्रां भ्रीं भ्रौं सः " इति मूलमंत्रं जपेत् ।

अथ केतुमन्त्रजपविधिः

ॐ अस्य श्रीकेतुमंत्रस्य मधुऋषिः गायत्रीछंदः केतुर्दैवता अभीष्टसिद्धये जपे विनियोगः ।

ॐ मधुऋषये नमः शिरसि । गायत्रीछंदसे नमः

मुखे। केतुदेवतायै नमः हृदये। संशक्तये नमः पादयोः। (इति ऋष्यादिन्यासः।)

ॐ अंगुष्ठाभ्यां नमः। प्रां तर्जनीभ्यां नमः। प्रीं मध्यमाभ्यां नमः। प्रौं अनामिकाभ्यां नमः। सः कनिष्ठिकाभ्यां नमः। ॐ प्रां प्रीं प्रौं सः करतलकर-पृष्ठाभ्यां नमः। (एवं हृदयादि०)

अथ ध्यानम्। "धूम्रो द्विबाहुर्वरदो गदाधरः कपिंजलस्थो विवधस्वरूपः। किरीटकेयूरविभूषितश्च सदास्तु मे केतुवरप्रदो वरः॥१॥" ॐ प्रां प्रीं प्रौं सः" इति जपेत्। (इति तंत्रोक्तो ज० स०)

अथ सूर्यादीनां दान-व्रत-पूजादिविधिः
तत्रादौ सूर्यशांतिः

आरंभे हस्तनक्षत्रयुतमादित्यवारं प्रगृह्य। भक्तितः सप्त नक्तव्रतानि कृत्वा। प्रतिरविवारे रक्तपुष्पाक्षता-

---

भाषा—यदि जन्म-वर्ष-मासादिमें सूर्य पूज्य हो या और कुछ कामना हो तो उसके निमित्त 'सूर्यशांति'

दिभिः अर्कमभ्यर्च्य। सप्तमे प्राप्ते शौचस्नानादि नित्यकर्म विधाय शुद्धासने उपविश्य। देशकालौ संकीर्त्य। मम अमुककामनासिद्ध्यर्थं सूर्यनारायण-प्रीतये सूर्यशांतिं करिष्ये। इति संकल्प्य गणपति-पूजनं पुण्याहवाचनं ब्राह्मणवरणं च कुर्यात्। ताम्रपात्रे सुवर्णमयीं सूर्यप्रतिमां संस्थाप्य षोडशोपचारैः संपूज्य। घृतेन संस्नाप्य रक्तपट्टवस्त्रेणाच्छाद्य रक्तचंदनपुष्पा

करना चाहिये। उसके लिये–हस्त रविवारसे आरंभ करके सात नक्त व्रत करके प्रत्येक रविवारको लाल फूल और अक्षतादिसे सूर्यका पूजन करे। सातवें वार शौचस्नानादि नित्यकर्म किये पीछे शुद्धासन पर बैठकर जो कुछ कामना हो उसका उद्देश्य करके संकल्प करे। और गणेशपूजन, ब्राह्मण–वरण, पुण्याहवाचन (एवं अग्नि-स्थापन) करे। तांबेके पात्रमें सुवर्णमयी सूर्यप्रतिमा स्थापन करके उसका आवाहन, आसन, पाद्य, अर्घ्य,

क्षतादिभिः संपूज्य लड्डुकादीन्निवेद्य । कुशकंडिकां कृत्वा, अर्कसमित्तिलपायसैः 'सूर्याय नमः स्वाहा' इति (मूलमंत्रेण वा) अष्टोत्तरशताहुतिं जुहुयात् । होमांते पूर्वोक्तां प्रतिमां वेदविदुषे ब्राह्मणाय दद्यात् । 'दानसामग्री' माणिक्यगोधूम-सुवर्ण-वस्त्र-धेनु-गुड-रक्तचंदन-कमलानि च दद्यात् । ब्राह्मणभोजनं व्रतविसर्जनं च कुर्यात् । (इति सूर्यशांतिः) ॥

आचमनादि उपचारोंसे पूजन करे । घीसे स्नान करावे, लालचंदन पुष्पाक्षतादिसे पूजन करके लाल वस्त्र चढावे और लड्डू तथा छत्रोपानहादि अर्पण करके कुशकंडिका करे । उसमें घी, तिल, खीर और आककी समिधाओंकी १०८ आहुति दे । होम किये पीछे सामग्री सहित सूर्य-मूर्ति तथा माणिक्य गोधूमादि दानसामग्री ब्राह्मणोंको देकर उनको भोजन करावे और व्रतका विसर्जन करे । इति सूर्यशांति ।

अथ चन्द्रशांतिः

चित्रायुते सोमदिने व्रतमारभ्य सप्तवारं कृत्वा। सप्तमे पूर्वोक्तप्रकारेण गणेशादीन् संपूज्य कांस्यपात्रे राजतीं चंद्रप्रतिमां संस्थाप्य श्वेतपुष्पाक्षतादिना संपूज्य श्वेतवस्त्रेणाच्छाद्य घृतपायसं निवेद्य। दधि-मधुघृताक्ताः पलाशसमिधः 'चंद्रमसे नमः स्वाहेति' (मूलमंत्रेण वा) अष्टोत्तरशतं जुहुयात्। होमांते चंद्रप्रतिमां ब्राह्मणाय दद्यात्। 'दानसामग्री' वंश-पात्रस्थ-तंडुल-कर्पूर-मौक्तिक-श्वेतवस्त्र-घृतकुंभ-

---

(चंद्रशांति) में चित्रा सोमवारमें व्रत आरंभ करके सातवार व्रत करे! सातवें दिन पूर्वोक्त रीतिसे गणेशा-दिका पूजन करके काँसीके पात्रमें चांदीकी चंद्रमूर्तिका चमेलीके पुष्प अक्षत आदिसे पूजन करके सफेद वस्त्र उढ़ाकर घी खीर भोग लगावे, पलाश अर्थात् छीलाकी समिधाओंमें घी खीर आदिका होम करे। और सामग्री-

वृषभं च दद्यात् । ब्राह्मणभोजनं व्रतविसर्जनं च कुर्यात् । इति चंद्रशांतिः ॥

अथ भौमशान्तिः

तत्र स्वातियुते भौमवारे व्रतमारभ्य सप्तवारं कृत्वा । सप्तमे पूर्वोक्तप्रकारेण गणेशादीन्संपूज्य । ताम्रपात्रे सौवर्णीं भौमप्रतिमां संस्थाप्य संपूज्य । रक्त-वस्त्रेणाच्छाद्य कंसारं निवेद्य दधिमधुघृताक्ताः खादिरीः समिधः 'भौमाय नमः स्वाहा' इति १०८ जुहुयात् । पूर्ववद्भौमप्रतिमां प्रवाल–गोधूम--मसूर–रक्तवृष--गुड–

सहित सोममूर्ति तथा दान सामग्री ब्राह्मणोंको देकर व्रत समाप्त करे । इति चन्द्रशान्ति ॥

इसी प्रकार स्वातीनक्षत्र भौमदिनसे आरंभ करके मंग-लवारके सात व्रत करे । सातवीं वार सोनेकी मूर्ति बन-वाकर ताम्रपात्रमें स्थापित कर लाल चंदन पुष्प अक्षत आदिसे पूजन करके लाल वस्त्र तथा कसारके लाड्डू चढावे ।

सुवर्ण--रक्तवस्त्र--ताम्रादींश्च दद्यात् । ब्राह्मणभोजनांते व्रतवि० कुर्यात् । इति भौमशान्तिः ॥

अथ बुधशान्तिः

विशाखायुते बुधवारे व्रतमारभ्य । प्रतिवारे बुधं संपूज्य । सप्तमे प्राप्ते सुवर्णप्रतिमां कांस्यपात्रे संस्थाप्य । शुक्लवस्त्रेणाच्छाद्य । गंधपुष्पादिभिः संपूज्य । गुडौदनं निवेद्य । दधिमधुघृताक्ता अपामार्गसमिधः पूर्ववज्जुहुयात् । होमांते सोपस्करां बुधप्रतिमां हरिद्वस्त्र--सुवर्ण---कांस्य---मुद्ग---गारुत्मद्--दासी--हस्तिदंत पुष्पाणि च ब्राह्मणाय दद्यात् । भोजनांते व्रतविसर्जनं कुर्यात् । (इति बुधशांतिः)

खैरकी समिधा होमे । दानसामग्री दे और भोजनादि करके व्रत विसर्जन करे । इति भौम शान्ति ॥

इसी प्रकार बुधमें विशाखा बुधवारसे, गुरुमें अनुराधा गुरुवारसे और शुक्रमें ज्येष्ठा शुक्रवारसे व्रत आरंभ

अथ गुरुशान्तिः

अनुराधायुते गुरुवारे व्रतमारभ्य । सप्त व्रतानि कृत्वा । सप्तमे सौवर्णी गुरुप्रतिमां पूर्ववत्संपूज्य पीतांबरैराच्छाद्य पीतपुष्पाक्षतादिना संपूज्य । खण्डखाद्यादीन्निवेद्य । अश्वत्थसमित्तिलघृतपायसैरष्टोत्तरशताहुतीर्जुहुयात् । होमांते सोपस्करां गुरुप्रतिमां पुष्पराग-मणिहरिद्रा--शर्करा--सैंधव--अश्व--पीतवस्त्र--पीतधान्य--सुवर्णानि दानसामग्री च वेदविदुषे ब्राह्मणाय दद्यात् । भोजनांते व्रतविसर्जनम् । इति गुरुशांतिः ।

अथ शुक्रशान्तिः

तत्र ज्येष्ठायुते शुक्रवारे आरभ्य सप्तव्रतेषु भूमावेव भोजनं कृत्वा । सप्तमावृत्तौ वंशपात्रे राजतीं शुक्र-

---

करके बुधमें सोनेकी मूर्तिको काँसीके पात्रमें बृहस्पतिमें सोनेकी मूर्तिको पीत आसनपर और शुक्रमें चांदीकी मूर्तिको बांसके पात्रमें स्थापन करके हरे, पीले और

प्रतिमां संस्थाप्य । श्वेतचंदनाक्षतपुष्पादिना संपूज्य । घृतयुतं पायसं निवेद्य । औदुंबरसमिधोऽष्टोत्तरशतं जुहुयात् । होमांते शुक्रप्रतिमां–चित्रवस्त्र–श्वेताश्व–धेनुवज्र–मणि–सुवर्ण–रजत–तंडुलानि च दद्यात् इति शुक्रशांतिः ।

अथ शनिशान्तिः

तत्र द्वादशाष्टमस्थे शनौ श्रावणादिमासे प्रथमश्निवारादारभ्य सप्त शनिवारव्रतानि कृत्वा । सप्तमे प्राप्ते पूर्वोक्तादित्यशांतिवत् सर्वं कृत्वा लोहपात्रे लोह-

---

चित्रित पुष्प, अक्षत, वस्त्र तथा नैवेद्य आदिसे यथाविधि पूजन करके बुधमें अपामार्ग, गुरुमें पीपल और शुक्रमें गूलरकी समिधाओंसे होमादि करके प्रतिमादानादि कर व्रत विसर्जन करे ।

शनिशांतिमें यदि वर्ष, मास या नाम आदिसे शनि आठवें बारहवें आदि अनिष्टकारी स्थानोंमें हो तो उसकी शांतिके लिये श्रावण आदि महीनोंमें पहले शनि वारसे

मयीं शनिप्रतिमां संस्थाप्य कृष्णवस्त्रेणाच्छाद्य माष-तिलकंबलयुतां कृत्वा पंचामृतेन तिलतैलेन च संस्नाप्य कस्तूरीकृष्णागुरुकृष्णपुष्पाक्षतादिभिः षोड-शोपचारैः संपूज्य। कृसरान्नं माषभक्तं पायसम् अविलीं पूरिकां च निवेद्य दधिमधुघृताक्ताः शाकल्यसहिताः शमीसमिधोऽष्टोत्तरशतं 'शनैश्चराय नमः स्वाहा' इति (मूलेन वा) अष्टोत्तरशताहुतीर्जुहुयात्। होमांते बलिदानं पूर्णाहुतिहोमं च संपाद्य प्रतिमाम् इन्द्रनील-

---

व्रत आरंभ करके सातवें शनिवारके दिन पूर्वोक्त रीतिसे गणेशादिक पूजन करके लोहेके पात्रमें लोहेकी मूर्ति रख-कर उसका पूजन करे। काला वस्त्र, उड़द, तिल और कंबल चढावे तेलसे स्नान करावे। कस्तूरी आदिसे षोडशो-पचार पूजन करे। खिचड़ी माष भक्त खीर-पूरी आदि भोग लगावे। और शमी (खेजरे) कीसमिधाओंसे होम करके बलिदान और पूर्णाहुति दे। फिर इन्द्रनील

माषतैल--तिल--कुलित्थ--महिषी---लोह---कृष्णधेनूश्च दद्यात् । इति शनिशांतिः ।

अथ राहुशान्तिः

तत्र शनिवारे राहुव्रतमारभ्य सप्तवारं कृत्वा सप्तमे प्राप्ते लोहपात्रे लोहप्रतिमां संस्थाप्य कृष्णवस्त्रेणाच्छाद्य गंधपुष्पादिभिः संपूज्य पायसं निवेद्य दूर्वांकुरैः अष्टोत्तरशताहुतीर्जुहुयात् । होमांते गोमेदाश्ववस्त्रकंबलतिलतैललोहानि राहुप्रतिमां च डाकसंज्ञकाय दद्यात् । इति राहुशांतिः ।

मणि, उडद, तिल, तेल, कुलथी, भैंस, लोह और काली गौ तथा शनि प्रतिमा ये सब डाकोतको देखकर भोजनादि किये पीछे व्रतका विसर्जन करे ।

इसी प्रकार राहु और केतुकी शांति करके दानसामग्री तथा मूर्त्ति आदि डाकोतको दे देवे । इनमें शनिवारसे व्रत आरंभ करे । और हवनमें दूर्वा तथा कुशाकी समिधा

अथ केतुशान्तिः

केतुव्रतमपि शनिवारे आरभ्य राहुवत् केतुप्रतिमां संपूज्य अष्टोत्तरशतकुशाञ्जुहुयात्। मृगमदं छागक्षीरं च खड्गपात्रे कृत्वा डाकसंज्ञकाय ब्राह्मणाय दद्यात्। इति केतुशांतिः।

इति तन्त्रोक्तनवग्रहशांति समाप्ता

होमे। यहाँ यह स्मरण रखना चाहिये कि यह विधान बहुत संक्षेपसे लिखा गया है अतएव किसी विशेष कारणसे विशेषरूपसे शांति करनी हो तो 'शांतिसार' और 'शांति-प्रकाश' आदि देख लेने चाहिये।

इति तंत्रोक्त नवग्रहशांति समाप्त

अथ नवग्रहस्तोत्रम्

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् ।
तमोरिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥
दधिशंखतुषाराभं क्षीरार्णवसमुद्भवम् ।
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् ॥ २ ॥
धरणीगर्भसंभूतं विद्युत्कांतिसमप्रभम् ।
कुमारं शक्तिहस्तं तं मंगलं प्रणमाम्यहम् ॥ ३ ॥
प्रियंगुकलिकाश्यामं रूपेणाप्रतिमं बुधम् ।
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् ॥ ४ ॥
देवानां च ऋषीणां च गुरुं कांचनसंनिभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥
हिमकुंदमृणालाभं दैत्यानां परमं गुरुम् ।
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥ ६ ॥
नीलांजनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तंडसंभूतं तं नमामि शनैश्चरम् ॥ ७ ॥
अर्धकायं महावीर्यं चंद्रादित्यविमर्दनम् ।

सिंहिकागर्भसंभूतं राहुं प्रणमाम्यहम् ॥ ८ ॥
पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥
इति व्यासमुखोद्गीतं यः पठेत्सुसमाहितः ।
दिवा वा यदि वा रात्रौ विघ्नशांतिर्भविष्यति ॥१०॥

इति नवग्रहस्तोत्रं समाप्तम् ।

परिशिष्ट

प्रसंगवश यहाँ यह बतला देना भी बहुत आवश्यक है कि ग्रहोंके निमित्त जो रविवार, सोमवार या मंगलवार आदिके व्रत किये जाते हैं उनकी यह विधि है—

सूर्य व्रतमें गेहूंके, चन्द्रमें चावलके, मंगलमें गेहूंके, बुधमें मूंगके, बृहस्पतिमें चनेके, शुक्रमें चावलोंके, शनिमें उड़दोंके और राहु केतुमें तिलोंके बनाये हुए लड्डू, चूरमा, हलवा या रोटी आदि जो कुछ भी बन सके किसी एक ही पदार्थका भोजन करना चाहिये ।

सो भी मध्याह्नके समय विना नमकके एकभुक्त खाना चाहिये ।

एतन्निमित्त ब्राह्मण भोजन करना हो तो उसमें भी सूर्यके लिये घी, गेहूं और चीनीका हलवा । चन्द्रके लिये चावल, चीनी, घी और दही । मंगलके लिये घी, गेहूं और गुडका चूरमा । बुधके लिये मूंग, घी और दही । बृहस्पतिके लिये बेसनके लड्डू या हलवा । शुक्रके लिये चावल, घी और चीनीका हलवा । शनिके लिये उड़दोंकी अमृती । और राहु तथा केतुके लिये तिलसकरी या तिलोंके लड्डू इनका भोजन कराना चाहिये । बहुधा लोग एक ही पदार्थसे तृप्त नहीं होते हैं अतः उनके लिये दही या दूध ले लेना चाहिये ।

इति श्रीमल्लक्ष्मीनारायणात्मजहनूमानशर्म-
संगृहीतो नवग्रहजपादिविधिः समाप्तः

पुस्तकें मिलने के स्थान :–

१. खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम् प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाड़ी
मुंबई–४०० ००४

२. गंगाविष्णु श्रीकृष्णदास,
लक्ष्मीवेंकटेश्वर स्टीम् प्रेस,
व बुक डिपो,
अहिल्या बाई चौक, कल्याण,
(जि० ठाणे–महाराष्ट्र)

३. खेमराज श्रीकृष्णदास, चौक–वाराणसी (उ. प्र.)

श्रीनवग्रह-स्तोत्र

जपाकुसुमसंकाशं काश्यपेयं महाद्युतिम् । तमोऽरिं सर्व-
पापघ्नं प्रणतोऽस्मि दिवाकरम् ॥ १ ॥ दधिशङ्खतुषाराभं क्षीरो-
दार्णवसम्भवम् । नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्
॥ २ ॥ धरणीगर्भसम्भूतं विद्युत्कान्ति-समप्रभम् । कुमारं
शक्तिहस्तं तं मंगलं प्रणमाम्यहम् ॥३॥ प्रियङ्गुकलिकाश्यामं
रूपेणाप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमा-
म्यहम् ॥ ४ ॥ देवानां च ऋषीणां च गुरुं कांचनसन्निभम् ।
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥ ५ ॥ हिमकुन्द-
मृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं भार्गवं
प्रणमाम्यहम् ॥ ६ ॥ नीलांजनसमाभासं रविपुत्रं यमाग्रजम् ।
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम् ॥ ७ ॥ अर्द्धकायं
महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसम्भूतं तं राहुं
प्रणमाम्यहम् ॥ ८ ॥ पलाशपुष्पसंकाशं तारकाग्रहमस्तकम् ।
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥ ९ ॥ इति व्यास-
मुखोद्गीतं यः पठेत् सुसमाहितः । दिवा वा यदि वा रात्रौ
विघ्नशान्तिर्भविष्यति ॥ १० ॥ नरनारीनृपाणां च भवेद्दु:-
स्वप्ननाशनम् । ऐश्वर्यमतुलं तेषामारोग्यं पुष्टिवर्धनम् ॥११॥

श्री व्यासविरचितं नवग्रहस्तोत्रं सम्पूर्णम्